# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

**कक्षा- शास्त्री-१ (SEM-1)** **प्रश्नपत्र-१** **गुणा: - ७०**

**विषय:- अनिवार्यसंस्कृतम्** **CF-111** **समय: - ०३ त: ०६**

**दिनाङ्क: - २४/११/२०१६** **सन्दर्भग्रन्थ:-मध्यसिद्धान्तकौमुद्यामच्सन्धि:।**

**अष्टाध्यायीभाष्यप्रथमावृत्ति: कारकसंज्ञा:( ब्रह्मदत्तजिज्ञासु: )**

---

**॥ प्रथमान्विति: ॥**

**प्र-१ द्वयो: सोदाहरणं व्याख्या ।** ०८

(क) माहेश्वरसूत्राणि (ख) सुप्तिङन्तं पदम् (ग) तस्मिन्निति निर्दिष्टे पूर्वस्य ।

**प्र-२ चतस्त्र: ससूत्रं साधनिका: ।** ०८

(क) मद्ध्वरि: (ख) पावक: (ग) क्षय्यम् (घ) कृष्णर्द्धि:

(ङ) स्वैरम् (च) शवेहि (छ) होतृकार: (ज) हरेऽव

**प्र-३ एका टिप्पणी ।** ०२

(क) गुणसन्धि: (ख) वृद्धिसन्धि:

**अथवा**

**प्रादय: उपसर्गा: लेख्या: ।**

**प्र-४ द्वयो: अतिलघूत्तरम्** ०२

(क) 'अच्सन्धि:' इत्यत्र 'अच्' अर्थात् किम्?

(ख) 'सुध्ध्य् + उपास्य:' इत्यत्र धकारस्य द्वित्वं केन सूत्रेण भवति?

(ग) निम्नेषु विकल्प: चेतव्य: 'प्रवत्सतरकम्बलवसनार्णदशानामृणे' इति वार्तिकं कस्मिन् सन्धौ?

(अ) पररूपसन्धौ (इ) गुणसन्धौ (उ) वान्तसन्धौ (ऋ) वृद्धिसन्धौ (लृ) पूर्वरूपसन्धौ

**॥ द्वितीयान्विति: ॥**

**प्र-५ एकस्य सोदाहरणं व्याख्या ।** ०४

(क) अनाम्नवतिनगरीणां ष्टुत्वमिति वाच्यम्

(ख) तस्मादित्युत्तरस्य (अथवा ख) मोऽनुस्वार: ।

**प्र-६ चतस्त्र:( ४ ) ससूत्रं साधनिका: ।** ०८

(क) शार्ङ्गिञ्जय: (ख) वागीश: (ग) तल्लय: (घ) उत्थानम्

(ङ) वाग्घरि: (च) आक्रंस्यते (छ) अङ्कित: (ज) त्वङ्करोषि

**प्र-७ द्वयो: टिप्पणी ।** ०४

(क) ष्टुत्वसन्धि: (ख) प्रत्यये भाषायां नित्यम् (ख अथवा) झरो झरि सवर्णे

(ग) अनुस्वारस्य ययि परसवर्ण: (घ) तच्शिव:-तच्छिव: ।

**प्र-८ द्वयोः उत्तरम् ।** ०४

(क) 'छे च' इति सूत्रेण कः आगमः का च साधनिका?

(ख) 'लक्ष्मीच्छाया' इत्यत्र कः आगमः कतमत् च सूत्रम्?

(ग) 'घनाघनः क्षोभणः' इत्यत्र कतमत् च सूत्रम्, किं तत् करोति?

**प्र-९ पञ्चानाम् अतिलघूत्तरम् ।** ०५

(क) 'श्चुत्वम्' इत्यत्र 'चु' अर्थात् के?

(ख) 'सत् + चित्' = ?

(ग) 'तुक्' इत्यत्र कः वर्णः अवशिष्यते?

(घ) 'झयो होऽन्यतरस्याम्' इति सूत्रं हकारस्य स्थाने वर्गस्य कतिथान् वर्णान् करोति?

(ङ) विसर्गस्य स्थाने सकारं कतमत् सूत्रं करोति?

(च) यत्र सकारस्य स्थाने शकारो जातः तादृशम् एकम् उदाहरणं लेख्यम् ।

(छ) 'रो रि' इति सूत्रेण किं भवति?

(ज) शम्भुस् + राजते, शम्भुरु + राजते, शम्भुर् + राजते = ?

**॥ तृतीयान्वितिः ॥**

(अधस्तनप्रश्नानाम् उत्तराणि ब्रह्मदत्तजिज्ञासुविरचितप्रथमावृत्तिमनुसृत्य लेख्यानि)

**प्र-१० एकस्य अनुवृत्ति-सूत्रप्रकार-पदच्छेदपूर्वकं सोदाहरणं व्याख्या ।** ०४

(क) कारके (ख) कर्मणायमभिप्रैति स सम्प्रदानम् ।

**प्र-११ षण्णाम् उत्तराणि; कतमत् उदाहरणं कस्य सूत्रस्य अधोभागे लिखितम्?** ०६

(क) चोरेभ्यो बिभेति/चोरेभ्यस्त्रायते

(ख) उपाध्यायाद् अधीते

(ग) देवदत्ताय रोचते मोदकः

(घ) देवदत्तमभिक्रुध्यति

(ङ) शताय परिक्रीतोऽनुब्रूहि/शतेन परिक्रीतोऽनुब्रूहि

(च) अक्षान् दीव्यति/अक्षैर्दीव्यति

(छ) विषं भक्षयति

(ज) शेते देवदत्तः,शाययति देवदत्तम्

(झ) देवदत्तो यज्ञदत्तेन कटं कारयति

**प्र-१२ 'अकथितं च' सूत्रस्य 'दुहियाचि....' इत्याद्यनुवृत्तिससन्दर्भसहितं सविस्तरं व्याख्यानं विधेयम् ।** ०८

**अथवा**

**'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' इति अनुवृत्तिसहितं सविस्तरं व्याख्यातव्यम् ।**

**प्र-१३ कस्मिन् सूत्रे कस्य केषां वा सूत्राणाम् अनुवर्तनम् इति उल्लेखः कर्तव्यः ( चतुर्णाम् )** ०४

(क) भीत्रार्थानां भयहेतुः (ख) अन्तर्धौ येनादर्शनमिच्छति (ग) श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः

(घ) अनुप्रतिगृणश्च (ङ) आधारोऽधिकरणम् (च) हृक्रोरन्यतरस्याम् (छ) स्वतन्त्रः कर्ता

**प्र-१४ त्रयाणाम् अतिलघूत्तराणि** ०३

(क) अस्य प्रश्नपत्रस्य यूनिट्-३ अध्येयांशः अष्टाध्यायीसूत्रपाठस्य कतमाध्यायस्य कतमपादाद् गृहीतः?

(ख) 'ध्रुवमपायेऽपादानम्' इत्यत्र 'अपाय' इत्यस्य कः अर्थः ग्रन्थकारेण कृतः?

(ग) 'आख्यातोपयोगे' इत्यत्र 'आख्याता' इत्यस्य कः अर्थः? (अथवा ग) अत्रैव 'उपयोग' इत्यस्य कः अर्थः?

(घ) 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इत्यत्र स्थितानां पदानां नियतग्रन्थानुसारं विभक्त्यादिपरिचयः प्रस्तोतव्यः।

(ङ) 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता' इत्यत्र स्थितानां पदानां नियतग्रन्थानुसारं परिचयः प्रस्तोतव्यः ।